# एकादशः पाठः

*इयम् एकाङ्की डॉ. नारायणशास्त्रीकांकरेण विरचिता अस्ति। अस्य महोदयस्य जन्म जयपुरनगरे अभवत्। अनेन संस्कृतभाषायां अनेकाः एकाङ्क्यः लिखिताः। तासां संकलनं 'एकाङ्कीसंस्कृतनवरत्नसुषमा' नामके अनेनैव विरचिते ग्रन्थे अस्ति। अकबरेण सह युद्धं कुर्वन् धनाभावे सैन्यशक्त्यभावे खिन्नः महाराणा प्रतापः स्वदेशं परित्यक्तुं समुद्यतः भवति। तस्मिन् अवसरे मेवाड़मन्त्री भामाशाहः आगत्य स्वकीयां विपुलां धनराशिं देशस्य स्वतन्त्रतायै प्रतापाय समर्पयति। इत्थमस्मिन् एकाङ्करूपके महाराणाप्रतापस्य कर्त्तव्यबुद्धिः, स्वराष्ट्रस्य स्वतन्त्रतायै दृढ़ेच्छाशक्तिः, स्वाभिमानं, भामाशाहस्य उदारता, देशरक्षायै स्वसम्पत्तिसमर्पणं च इत्येवमादयः विशिष्टाः गुणाः वर्णिताः सन्ति।*

## स्वदेशं कथं रक्षेयम्

*(मेवाड़ाधिपतिः महाराणाप्रतापः अरण्ये स्वसहचरेण सह एकस्यां शिलायाम् उपविष्टः वर्तते। असौ प्राणैः अपि स्वदेशं रक्षितुम् इच्छति। साधनाभावात् किमपि कर्तुम् असमर्थः स मनसि किञ्चित् विचारयन्नस्ति)*

**प्रतापः** – अरे धिक् माम्। यदि अहं मातृभूमिं रक्षितुं न शक्नोमि, किम् अत्र वासेन मे प्रयोजनम्। *(दीर्घं निःश्वसिति)*

*(ततः प्रविशति कश्चन राजपुत्र-सर्वदारः)*

**सर्वदारः** – (राजोचितं प्रणम्य) विजयतां विजयतां महाराजः।

**प्रतापः** – *(दीर्घं निःश्वस्य मुखम् उन्नमय्य च)* हा धिक्। विजयध्वनिं कृत्वा त्वम् अपि किम् एवं मां लज्जयसे भ्रातः!

**सर्वदारः** – प्राणाधार! किम् इदं भवान् वदति? स्वधर्माय भवता सर्वं किम् अपि कृतम्। स्वाधीनतायै सर्वं किम् अपि सोढम्। भवतः सदा विजयः एव भविष्यति।

**प्रतापः** – कीदृशस्तावद् विजयः? स्वदेशं परित्यक्तुं तु समुद्यतः अस्मि!

**द्वितीयसर्वदारः** – *(उत्थाय साञ्जलिः)* नहि नहि महाराज! यत्र-यत्र भवान् गमिष्यति, तत्र-तत्र वयम् अपि अनुगमिष्यामः।

**प्रतापः** – एवं न वाच्यम्। भवन्तः अत्र स्थित्वा एव मातृभूमेः सेवां कुर्वन्तु।

**तृतीयसर्वदारः** – नहि भगवन्! अस्माकं सेवाः भवता सह सन्ति। वयं तु भवता सह एव निवत्स्यामः।

**प्रतापः** – यद् रोचते भवद्भ्यः, कुर्वन्तु। न अहं भवतः विवशान् करोमि।

*(महाराणा प्रतापेन सह सर्वे अपि अनुचराः ततः उत्थाय भिल्लानाम् आवासस्य मध्यतः*

*निःसरन्ति।)*

**प्रथमः भिल्लः** - हा भगवन्! अद्य कीदृशः समयः आगतः? प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति।

**द्वितीयः भिल्लः** - न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर!! त्वम् अपि अद्य इयान् निष्ठुरः कथं जातः!

**तृतीयः भिल्लः** - हा धिक्! वराकस्य समीपे न जीवनसामग्री न च युद्धसामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? *(रोदिति)*

*(भिल्लानां प्रलापं श्रुत्वा)*

**एकः सहचरः** - हा धिक्! एते भिल्लाः सत्यम् एव वदन्ति। अयं समयः देशाय धर्माय च न शोभनः। परं किं क्रियेत? *(असिं निःसार्य प्रतापाय ददत्)* प्रभो! बलिं ददातु मम भवान् अनेन। न आत्मचक्षुषा मेवाड़भूमेः दुर्दशा द्रष्टुं शक्यते।

**द्वितीयः सहचरः** - सत्यम् एव साम्प्रतं जीवनं नरकायते।

**भिल्लाः** - हा! अस्माकम् अपि जीवनेन को लाभः? यदि वयं देशरक्षायै न किम् अपि कर्तुं समर्थाः, तदा मरणम् एव अस्माकं श्रेयस्करम्।

**प्रतापः** - हा धिक्! भवन्तः सर्वे इदं किं कुर्वन्ति? आत्महननं महत्पापं वर्तते। स्थीयतां स्थीयताम्। कष्टानि सोढ्वा वीरगत्या मरणं कल्याणकरं कथ्यते। इत्थम् आत्महननं तु नपुंसकानां कर्म। किञ्चिद् धैर्येण विचारयन्तु।

*(पृष्ठतः ध्वनिः भवति - स्थीयतां स्थीयतां प्रभो! स्थीयतां स्थीयताम्!!)*

**प्रतापः** - *(परिचित-ध्वनिमिव आकर्ण्य सोत्साहम्)* अरे सर्वदार! वृक्षम् आरुह्य दृश्यतां तु तावद् कः अयं शब्दायते?

**सर्वदारः** - *(तथा निपुणं निरीक्षमाणः)* महाराज! मेवाड़मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते।

**प्रतापः** - हुँ, किम् उक्तम्! भामाशाहः? तस्य कथम् इदं ज्ञातम् अभूत्? अस्तु तावत्, प्रतीक्षामहे तम्। *(भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)*

**भामाशाहः** - *(प्रणम्य)* अन्नदातः! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता?

**प्रतापः** - *(दीर्घं निःश्वस्य)* न क्व अपि बन्धो! गन्तुं शक्यम् अपि तु न। पार्श्वे धनं नैव, न च सेना एव। अहं स्वदेशं कथं रक्षेयम्? अस्माद् एव मनः दोलायितम् अस्ति।

**भामाशाहः** - महाराज! यदा इमान् समाचारान् अशृण्वम् तदा हृदयं मे भग्नम् इव अभवत् *(धनग्रन्थिं निर्दिश्य)* इयं पुनः सम्पत्तिः कस्मै प्रयोजनाय? यदि ईदृशे एव अवसरे न इयम् उपयुज्येत!

**प्रतापः** - भवान् सत्यं वदति।

**भामाशाहः** - यदि एवं, गृह्यतां भवदीया सम्पत्तिः श्रीमता एव। त्रोट्यतां पारतन्त्र्य-शृंखला एभिः

लोहमय-बाहुभिः ! स्वतन्त्रः क्रियतां स्वदेशः !! सुरक्ष्यतां धर्मः !!!
*(धनस्य ग्रन्थिकां चरणयोः अर्पयति सप्रणामम्)*

**प्रतापः** – *(साश्चर्यम्)* किम् इदं भवान् करोति ? भवदीया सम्पत्तिः कथं मदीया ? किम् एतेन न मे अपमानः ? न अहं दत्तां सम्पत्तिं पुनराददामि।

**भामाशाहः** – *(सविनयम्)* महाराज ! न अहम् अपमानं करोमि। का तुच्छ-सेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात्। गृह्यतां महाराज ! गृह्यताम् ! देश-धर्मयोः रक्षा विधीयताम् !

**प्रतापः**- *(सहर्षम् आदाय)* धन्यः असि मन्त्रिवर्य ! धन्यः। त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय ! अस्यां कियती सम्पत्तिः ?

**भामाशाहः** – *(प्रसन्नमुखः प्रणम्य)* महाराज ! इयती एव स्वल्पतमा यद् अनया द्वादशवर्षाणि यावत् पञ्चविंशतिसहस्रसैनिकाः सहर्षं योद्धुं शक्नुवन्ति।

**प्रतापः** – अहो ! तदा तु किं कथनीयम् ? महत्कार्यं सेत्स्यति अनया। *(सर्वान् सम्बोध्य)* अद्य अस्मात् एव क्षणात् राणा स्वदेशस्य पारतन्त्र्य-शृंखलाः त्रोटयितुं शत्रून् संहारयितुं धर्मं रक्षितुं च योत्स्यते, योत्स्यते अवश्यं योत्स्यते ! *(भामाशाहम् अभिलक्ष्य)* धन्योऽसि मित्र ! धन्यः। एहि त्वां गाढम् आलिङ्गितुम् अभिलषामि।

**भामाशाहः** – *(प्रतापं ससंकोचम् उपसृत्य)* अनुगृहीतः अस्मि स्वामिन् ! अनुगृहीतः।
*(ततः उभौ अपि प्रेम्णा परस्परम् आलिङ्गतः, द्वयोः मेलनं विलोक्य सर्वे सहचराः सहर्षम्)*

**धन्योऽस्ति राणा, पुनरस्ति मन्त्री, धन्यं द्वयोर्मेलनमस्ति धन्यम्।**
**धन्या वयं स्मः समयश्च धन्यः, धन्यं पुनर्दर्शनमस्ति पुण्यम्।।**

स्वदेशः विजयताम् ! महाराणा विजयताम् !! भामाशाहः विजयताम् !!!
*(पटाक्षेपः)*

## शब्दार्थाः

**अधिपतिः** — राजा, **अरण्ये**-वने। **सहचरेण** — सहयोगिना। **शिलायाम्** — पर्वतखण्डे। **उपविष्टः** — स्थितः। **साधनाभावात्** — साधनानाम् अभावात्। **कश्चन** — कश्चित्। **राजोचितम्** — राजानुरूपम्। **उन्नमय्य** — उत्थाप्य। **स्वाधीनतायै** — स्वतन्त्रतायै, **सोढम्** — विसोढ़म् (सहा)। **समुद्यतः** — सन्नद्धः। **साञ्जलिः** — अञ्जलि-सहितम् (प्रणामपूर्वकम्)। **अनुगमिष्यामः** — अनुगमनं करिष्यामः। **भिल्लः** — भील इति भाषायाम्। **निःसरन्ति** — गच्छन्ति। **परित्यज्य** — त्यक्त्वा, **इयान्** — एतावत्। **निष्ठुरः** — संवेदनाहीनः। **वराकस्य** — असहायस्य। **असिम्** — खड्गम्। **निःसार्य** — बहिः कृत्वा। **साम्प्रतम्** — अधुना। **नरकायते** — नरकम् इव भवति। **देशरक्षायै** — देशस्य रक्षार्थम्। **श्रेयस्करम्** — उचितम्। **आत्महननम्** — आत्महत्या। **महत्पापम्** — अत्यन्तं पापम्। **स्थीयताम्** — तिष्ठन्तु। **सोढ्वा** — भुक्त्वा। **कल्याणदम्** — कल्याणकारी। **आकर्ण्य** — श्रुत्वा। **सोत्साहम्** — उत्साहपूर्वकम्। **सर्वदारः**

— सरदार इति भाषायाम्। **आरुह्य** — आरोहणं कृत्वा। **निपुणम्** — ध्यानपूर्वकम्। **निरीक्षमाणः** — निरीक्षणं कुर्वन्। **प्रतीयते** — आभासते। **उक्तम्** — वदति। **अभूत्** — अभवत्। **प्रतीक्षामहे** — प्रतीक्षां कुर्महे। **धनराशिग्रन्थिम्** — धनस्य पोटली इति भाषायाम्। **आदाय** — गृहीत्वा। **आयाति** — आगच्छति, **प्रणम्य** — नमस्कृत्य। **अन्नदाता** — भरणपोषणकर्त्ता। **क्व** — कुत्र। **पार्श्वे** — निकटे, **दोलायितम्** — कम्पनयुक्तम्। **उपयुज्येत** — उपयोगं कुर्यात्। **त्रोट्यताम्** — भग्नां कुर्वन्तु। **पारतन्त्र्य शृंखला** — परतन्त्रतायाः बन्धनम्, **भवदीया** — तव, **मदीया** — मम, **आददामि** — स्वीकरोमि। **विधीयताम्** — करोतु। **मन्त्रिवर्यः** — मन्त्रिश्रेष्ठः, **इयती** — एतावती, **शक्नुवन्ति** — समर्थाः भवन्ति। **सेत्स्यति** — सिद्धं भविष्यति। **योत्स्यते** — युद्धं करिष्यति। **गाढ्म** — अत्यधिकम्, **अभिलषामि** — इच्छामि। **ससंकोचम्** — संकोचपूर्वकम्। **उपसृत्य** — निकटं गत्वा। **अनुगृहीतः** — धन्यः।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. महाराणा प्रतापः राजा आसीत् —
   (क) मारवाड़ राज्यस्य  (ख) मेवाड़ राज्यस्य
   (ग) भरतपुरराज्यस्य  (घ) अलवरराज्यस्य  ( )

२. महाराणा प्रतापः कष्टं स्वीकरोति —
   (क) धनसंग्रहणाय  (ख) राज्यसुखाय
   (ग) देशस्य स्वाधीनतायै  (घ) भोजनाय  ( )

३. किं महत्पापं वर्तते —
   (क) आत्मधनम्  (ख) आत्मेच्छा
   (ग) आत्महननम्  (घ) आत्मप्रशंसा  ( )

४. किं कल्याणप्रदं उच्यते —
   (क) वीरगत्या मरणम्  (ख) आत्महननम्
   (ग) परनिन्दा  (घ) आत्मप्रशंसा  ( )

५. महाराणाप्रतापः कथं स्वदेशं रक्षितुम् इच्छति —
   (क) धनैः  (ख) प्राणैः
   (ग) विचारैः  (घ) उद्घोषैः  ( )

**लघूत्तरात्मक-प्रश्नाः**

१. महाराणा प्रतापः कुत्र उपविष्टः आसीत् ?
२. भामाशाहः कः आसीत् ?
३.भामाशाहः किं आदाय प्रतापस्य समीपम् आगच्छति ?
४. प्रतापः कस्य अभावे किमपि कर्तुम् असमर्थः ?

५. भिल्लाः किं कर्तुम् उद्यताः भवन्ति ?

**निबन्धात्मक-प्रश्नाः**

१. प्रतापः अरण्ये उपविष्टः किमर्थं खिन्नः भवति ?

२. आत्महननं किमर्थं महत्पापम् अस्ति ?

३. भामाशाहः किं निमित्तं स्वकीयं धनं प्रतापाय अर्पयति ?

४. भामाशाहः कियत् धनं प्रतापाय ददाति ?

५. धनं प्राप्य महाराणाप्रतापः किं उद्घोषयति ?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (ख) २. (ग) ३. (ग) ४. (क) ५. (ख)

**लघूत्तरात्मक-प्रश्नाः**

१. अरण्ये एकस्यां शिलायाम् २. मेवाड़मन्त्री ३. धनराशिग्रन्थिम् ४. धनाभावे ५. आत्मबलिदानम्

**व्याकरणा-प्रश्नाः**

१. निम्नलिखितानां समासयुक्तानां पदानां समास-नामोल्लेख-सहितं विग्रहं कुरुत —

| **पदम्** | **विग्रहः** | **समास-नाम** |
|---|---|---|
| (क) महत्पापम् | ...................... | .................... |
| (ख) परमेश्वरः | ...................... | .................... |
| (ग) तुच्छसेवकः | ...................... | .................... |
| (घ) वीरपुरुषः | ...................... | .................... |

२. निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत —

(क) अनेनैव ................ + ................

(ख) धन्योऽसि ................ + ................

(ग) राजोचितम् ................ + ................

(घ) देह्येतत् ................ + ................

३. कोष्ठकगत-संकेतानुसारं रिक्तस्थानानां पूर्तिं कुरुत —

(क) आवां विद्यालयं ................। (गम्)

(ख) यदा श्याम ................ तदा मोहनः ................। (पच्, खाद्)

(ग) सुधीरः नरेन्द्रेण सह विद्यालये ................। (पठ्)

(घ) युवां अत्र किं ................। (कृ)

४. निम्नलिखितानि वाक्यानि संशोधयत —

(क) पुत्रं सह पिता आगच्छति।

(ख) उदयपुरस्य परितः जलम् अस्ति।

(ग) हरिं नमः

(घ) धर्माय विना न सुखम्।

५. स्थूलाक्षर-पदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत —

(क) **आत्महननं** महत्पापम् अस्ति।

(ख) अनेन द्वादशवर्षाणि यावत् **पञ्चविंशतिसहस्त्रं** सैनिकाः सहर्षं योद्धुं शक्नुवन्ति।

(ग) महाराणाप्रतापः **अरण्ये एकस्यां शिलायाम्** उपविष्टः वर्तते।

(घ) विजयतां **महाराजः**।

(ङ) भवतां वीरता धीरता च **देशरक्षायै** महान्तं सहयोगं कृतवती।

**प्रयोगात्मक-कार्यम्**

स्व-विद्यालयस्य संस्कृत-दिनोत्सवे, वार्षिकोत्सवे, अन्यस्मिन् वा कस्मिंश्चित् अवसरे अस्य एकाङ्क-नाट्यस्य प्रयोगः (अभिनयः) शिक्षकस्य निर्देशने करणीयः।

